# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा –आचार्य–२ (SEM-३) | प्रश्नपत्रम् – २<br>(C.C- 5.3.7 )<br>**सन्दर्भग्रन्थः– व्युत्पत्तिवादः**<br>**प्रथमाकारकम्** | गुणाः – ७० |
| विषयः – नव्यन्यायः | | |
| दिनाङ्कः – १०/१०/२०१९ | | समयः– ३ तः ६ |

### ( विभाग-1 )

**प्र-1 एकः समाधेयः ।** 05

1. 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन' इति नियमं परिष्कुरुत ।
2. 'नीलस्य घटः' इत्यत्र अभेदान्वयापत्तिं वारयत ।

**प्र-2 एकः समाधेयः ।** 10

1. यथाग्रन्थं साजात्यस्वरूपं विशदयत ।
2. 'शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते' व्याख्यात ।

### ( विभाग-2 )

**प्र-3 एकः समाधेयः ।** 05

1. 'घटो घटः' इत्यत्र शाब्दबोधवारणाय किमभिहितम् ?
2. 'राज्ञः पुरुषः' इत्यत्र स्वत्वसंसर्गान्वयबोधवादिमतमुपपाद्य निराकुरुत ।

**प्र-4 एकः समाधेयः ।** 10

1. 'निपातातिरिक्तनामार्थयोः न भेदान्वयबोधः' सोदाहरणं लिखत ।
2. संख्यायाः विभक्त्यर्थमुपपाद्य मतान्तरनिरसनपूर्वकं सिद्धान्तमुपपादयत ।

### ( विभाग-3 )

**प्र-5 एकः समाधेयः ।** 05

1. 'आकाशं न द्वे' इत्यप्रमात्वस्य उपपत्तिं निरूपयत ।
2. 'धवखदिरौ' इत्यत्र शाब्दबोधप्रकारं लिखत ।

**प्र-6 एकः समाधेयः ।** 10

1. 'वह्निना सिञ्चति' इति वाक्यस्य अप्रामाण्यं प्रतिपादयत ।
2. पर्याप्तिसम्बन्धस्य स्वरूपं फलं च निरूपयत ।

### ( विभाग-4 )

**प्र-7 एकः समाधेयः ।** 05

1. 'एतद्देशवृत्तिदशायां घटाः सन्ति' इति प्रयोग: कथं न भवति? व्याख्यात ।
2. 'जात्याकृतिविशिष्टः पदार्थः' विशदयत ।

**प्र-8 एकः समाधेयः ।** **10**

1. आख्यातैकवचनस्य संख्यार्थकत्वम् उपपाद्य युक्तं पक्षमुपपादयत ।
2. नित्यबहुवचनान्ताबादिशब्दानां प्रमाबहुवचनत्वं सार्थकम् उत न ? विशदयत ।

## ( विभाग-5 )

**प्र-9 दश प्रश्नाः समधेयाः ।** **05**

1. व्युत्पत्तिवादस्य कर्ता कः ?
2. सम्बन्धः कतिविधः ?
3. भास् धातोः कोऽर्थः ?
4. किन्नाम स्वसमानविभक्तिकत्वम् ?
5. 'शतं ब्राह्मणाः' इत्यत्र कः नियमः ?
6. विभक्तेः प्रकारद्वयं किम् ?
7. किन्नाम साजात्यम् ?
8. किन्नाम संख्याविरुद्धत्वम् ?
9. कार्यकारणभावो कतिविधिः ?
10. अभेदस्य संसर्गमर्यादया भानं कुत्र भवति ?
11. सुब्विभक्तिः कतिविधा ?
12. किन्नाम असाधारण्यम् ?
13. किन्नाम व्यापकत्वम् ?
14. विभक्तय: कति सन्ति ?
15. गतिबुद्धिप्रत्यव........................।। पूरयत ।

***************

**उत्तराणि**

1. गदाधरभट्टाचार्यः ।
2. भेदरुपः, अभेदरुपः ।
3. प्रत्ययार्थ आश्रयता ।
4. स्वप्रकृतिकविभक्ति सजातीयविभक्तिकत्वम् ।
5. विंशत्याद्याः सदैकत्वे ।
6. सुप्तिङ्गन्तम् ।
7. स्वसमभिव्याहृतपदार्थ संसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकत्वम् ।
8. संख्यासमानाधिकरण्यम् ।
9. द्विविधः- 1) आत्मनिष्ठप्रत्यासत्या 2) विषयनिष्ठप्रत्यासत्या
10. समासस्थले ।
11. द्विविधा – 1) कारक 2) उपपद
12. एकमात्रवृत्तित्वम् ।
13. अधिकदेशवृत्तित्वम् ।
14. सप्त ।
15. गतिबुद्धिप्रत्यवसानार्थकर्माकर्मकाणामणिकर्ता स णौ ।